धनर्णत्वं ज्ञेयं तथाकृते जातौ लब्धिगुणौ १४ । ८ ऋणक्षेपे तु योगजे तत्क्षणाच्छुद्धे इत्यादिना लब्धिगुणौ ४ । २ भाजकस्य धनत्वे ऋणत्वे वा लब्धिगुणावेतावेव । परन्तु भाजके भाज्ये वा ऋणगते लब्धेः ऋणत्वं सर्वत्र ज्ञेयम् । उदाहरणम् । येन सङ्गुणिताः पञ्च त्रयोविंशतिसंयुताः । वर्जिता वा त्रिभिर्भक्ता निरग्राः स्युः स को गुणः । न्यासः भा ५ हा ३ क्षे २३ अत्र वल्ली १ । १ । २३ । ० । पूर्ववज्जातं राशिद्वयम् ४६ । २३ अत्र तत्क्षणेऽधोराशौ सप्त लभ्यन्ते, ऊर्द्ध्वराशौ तु नव लभ्यन्ते ते नव न ग्राह्याः'गुणलब्ध्योः समं ग्राह्यं धीमता तत्क्षणे फलमित्यतःसप्तैव ग्राह्याइति जातौ लब्धिगुणौ ११ २ वियोगजे एतौ स्वस्वतक्षणाभ्यां शोधितौ जातौ ऋणक्षेपे६ं । १इष्टाहतस्वस्वहरेण युक्ताविति द्विगुणितौ स्वस्वहारौ क्षेप्यौ यथा धनलब्धिः स्यादिति कृते जातौ लब्धिगुणौ ४ । ७ एवं सर्वत्र ज्ञेयम् । अथ वा हरतष्टे धनक्षेपइति न्यासः भा ५ हा ३ क्षे २ पूर्ववज्जातौ लब्धिगुणौ योगजौ ४ । २ एतौ स्वतक्षणाभ्यां शुद्धौ १ । १ जातौ वियोगजौ । क्षेपतक्षणलाभाढ्या लब्धिरिति क्षेपतक्षणलाभेन ७ योगजलब्धिर्युता ११ जाता योगजा लब्धिः शुद्धौ तु वर्ज्जितेति तक्षणलाभेन ७ लब्धिरियं१ वर्ज्जिता६ं धनलब्ध्यर्थं द्विगुणे हरे क्षिप्ते जातौ तावेव लब्धिगुणौ ४ । ७ । अथवा भागहारेण तष्टयोरिति न्यासः भा२ हा ३ क्षे २ अत्रापि जातं राशिद्वयं २ । २ तक्षणाज्जातं २ । २ । अत्रापि जातः पूर्व्व एव गुणः २ लब्धिस्तु भाज्याद्धतयुतोद्धृ नादिति गुण २ गुणितोभाज्यः १० क्षेप २३ युतो ३३ हरभक्तोलब्धिःसैव ११ । उदाहरणम् येन पञ्च गुणिताः खसंयुताः पञ्चषष्टिसहिता श्च तेऽथ वा । स्युस्त्रयोदशहृतानिरग्रकास्तं गुणं गणक ! कीर्त्तयाशु मे । न्यासः भा ५ हा १३ क्षे ० क्षेपाभावे गुणाप्ती ०।०। एवं पञ्चषष्टिक्षेपे ० । ५ वा१३ । १०इत्यादि । अथ स्थिरकुट्टके सूत्रं वृत्तम् । क्षेपं विशुद्धिं परिकल्प्य रूपं पृथक् तयोर्ये गुणकारलब्धी । अभीप्सितक्षेपविशुद्धिनिघ्ने स्वहारतष्टे भवतस्तयोस्ते । प्रथमोदाहरणे दृढभाज्यहारयोः रूपक्षेपस्य च न्यासः भा १७ हा १५ क्षे १ अत्रोक्तवद्गुणाप्ती ७ । ८ एते अभीष्टपञ्चगुणे स्वहारतष्टे जाते ५ । ६ ते एव । अथ रूपशुद्धौ गुणाप्ती ८ । ९ एते पञ्चकगुणे स्वहारतष्टे जाते १० । ११ ते एव एवं सर्वत्र । अस्य गणितस्य ग्रहगणिते महानुपयोगः । तदर्थं किञ्चिदुच्यते । कल्प्याविशुद्धिर्विकलावशेषं षष्टिश्च भाज्यः कुदिनानि हारः । तज्जं फलं स्युर्विकला गुणस्तु लिप्ताग्रमस्माच्च कला लवाग्रम् । एवं तदूर्द्ध्वं च तथाऽधिमासावमाग्रकाभ्यां दिवसा रवीन्द्वोः । ग्रहस्य विकलावशेषाद्ग्रहाहर्गणयोरानयनम् । तद्यथा । षष्टिर्भाज्यः । कुदिनानि हारः । विकलावशेषं शुद्धिरिति प्रकल्प्य साध्ये गुणाप्ती । तत्र लब्धिर्विकलाः स्युर्गुणस्तु कलावशेषम् । एवं कलावशेषं शुद्धिः । षष्टिर्भाज्यः । कुदिनानि हारः फलं कलाः गुणोऽंशशेषम् । एवमंशशेषं शुद्धिस्त्रिंशद्भाज्यः । कुदिनानि हारः । फलं भागाः गुणोराशिशेषम् । एवं राशिशेषं शुद्धिर्द्वादश भाज्यः । कुदिनानि हारः । फलं गतराशयोगुणोभगणशेषम् । एवं कल्पभगणाभाज्यः । कुदिनानि हारः । भगणशेषं शुद्धिः फलं गतभगणाः गुणोऽहर्गणः स्यादिति । अस्योदाहरणानि त्रिप्रश्नाध्याये । एवं कल्पाधिमासाभाज्यो, रविदिनानि हारो, ऽधिमासशेषं शुद्धिः । फलं गताधिमासाः, गुणो गतरविदिवसाः । एवं युगावमानि भाज्यश्चन्द्रदिवसाहारोऽवमशेषं शुद्धिः । फलं गतावमानि । गुणोगतचन्द्रदिवसाइति ।

अथ संश्लिष्टकुट्टके करणसूत्रं वृत्तम् । एकोहरश्चेद्गुणकौ विभिन्नौ तदा गुणैक्यं परिकल्प्य भाज्यम् । अग्रैक्यमग्रं कृतउक्तवद्यः संश्लिष्टसंज्ञः स्फुटकुट्टकोऽसौ । उदाहरणम् । कः पञ्चनिघ्नोविहृतस्त्रिषष्ट्या सप्तावशेषोऽथ सएव राशिः । दशाहतः स्याद्विहृतस्त्रिषष्ट्या चतुर्द्दशाग्रोवद राशिमेनम् । अत्र गुणैक्यं भाज्यः अग्रमेव राशिः अग्रैक्यं शुद्धिरिति न्यासः भा१५ हा६३ क्षेपः २१ पूर्ववज्जातोगुणः १ लब्धिः२" ।

**कुट्टनी** स्त्री कुट्ट—ल्युट् ङीप् । (कुट्नी) परपुरुषेण सह परस्त्रियाः समागमकारयित्र्यां स्त्रियाम् । "तदालिङ्गनमवलोक्य समीपवर्त्तिनी कुट्टन्यचिन्तयत् अकस्मादियमेनमुपगूढवतीति ततस्तया कुट्टन्या तत्कारणं परिज्ञाय सा लीलावती गुप्तेन दण्डिता" हितो० । णिनि कुट्टिन्यप्यत्र

**कुट्टमित** न० "केशस्तनाधरादीनां ग्रहे हर्षेऽपि सम्भ्रमात् । प्राहुः कुट्टमितं नाम शिरःकरविधूननम्" इति सा०द० उक्ते स्त्रीणां विलासभेदे । उदा० यथा "पल्लवोपमितिसाम्यसपक्षं दष्टवत्यधरबिम्बमभीष्टे ।